# DinacharyaShTakam

# દિનચર્યાષ્ટકમ્

## Document Information

Text title : Dinacharyashtakam

File name : dinacharyAShTakam.itx

Category : misc, aShTaka, advice, dashaka

Location : doc_z_misc_general

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 22, 2026

*sanskritdocuments.org*

# દિનચર્યાષ્ટકમ્

॥ શ્રીરામસમર્થઃ ॥

(સ્તોત્રનક્ષત્રમાલાન્તર્ગતમ્ । )
શુદ્ધિશ્ચિત્તસ્ય ચોષો મનુજજનિવશાજ્જાગ્રતી જ્ઞાનશક્તિ-
ર્હ્યાત્માનાત્માऽऽવિવેકો દિવસકૃદુદયોऽરાગિતૈવ પ્રકાશઃ ।
ત્યક્ત્વા સમ્પત્સુતોર્વિમુખવિષયગણં ચૈવ વિષ્ઠાં તદાનીં
પશ્ચાત્સ્નાનં ચ કાર્યં ચિદહમિતિશુભજ્ઞાનગઙ્ગાજલેન ॥ ૧॥

સચ્ચિત્સૌખ્યં ત્રિપુણ્ડ્રં હ્યવિરતમનનં ધારણં ભસ્મનો વૈ
સન્ધ્યાકર્મૈવ સાક્ષાદ્વિરહિતમનસા દર્શનં તસ્ય યત્તુ ।
વૃત્ત્યોર્મધ્યે સુપૂર્ણં વિમલમવિચલં બ્રહ્મ કલ્યાણરૂપં
સ્વાનન્દં સ્વેનમાત્રં સકલહૃદિગતં વાઙ્મનોતીતમેકમ્ ॥ ૨॥

આત્મારામસ્ય પૂજાં સ્વહૃદયકમલે પ્રાજ્ઞ ! નિર્વર્તનીયા
પાદ્યાર્ઘ્યસ્નાનમુખ્યા વિવિધવિધિકલા માસ્તુ સઙ્કલ્પ એવ ।
નૈવાસ્તિ બ્રહ્મણોऽન્યત્ત્રિભુવનજઠરે સત્પદાર્થો દ્વિતીયો
હ્યેતદ્વૃત્તિપ્રવાહો નિરવધિરચલઃ સ્વાત્મલિઙ્ગસ્ય પૂજા ॥ ૩॥

કર્તવ્યો બ્રહ્મયજ્ઞો હ્યવિરતમનસા બ્રહ્મયાથાત્મરૂપ-
સ્તદ્વચ્છુદ્ધાત્મના વૈ ત્રિવિધમિદમહો ! દૈવમાર્ષં ચ પૈત્ર્યમ્ ।
વિજ્ઞાનાત્માम્બુજાલૈસ્તિલયવસહિતૈસ્તર્પણં ચિન્તનં ત-
ત્યક્ત્વા ભાનં દ્વિતીયં ભવભયરહિતં બ્રહ્મણઃ સ્વાત્મનો વૈ ॥ ૪॥

કૃત્વાऽऽદૌ વૈશ્વદેવં નિયમિતમનસા જ્ઞાનવહ્નૌ સુમાયા-
ભાનં હ્યન્નં ચ હુત્વા તદુપરિ વિવિધં વૃત્તિરૂપં સુપાકમ્ ।
આત્મારામં સમર્પ્ય હ્યનુદિવસનિશં ભોજનં કાર્યમેક્
ચાતુર્યં ભોજનાદૌ યદિ ન વિલસતે તર્હિ રોગશ્ચ ભૂયાત્ ॥ ૫॥

પેયં જ્ઞાનામૃતં સત્સતતમવિચલં ભોજ્યમત્યન્તશુદ્ધં

લેહ્યં બ્રહ્મૈવ વસ્તુ હ્યઘટિતઘટનાદ્વૈતમાયાવિશેષમ્ ।
ચોષ્યં વિશ્વાત્મકં યત્ત્વાવિરતમનનં ભોજનાન્તે ચ તક્રં
સુજ્ઞો યો વૈ પિબેત્તદ્ભવભયરહિતો મુક્તિભાગેવ સ સ્યાત્ ॥ ૬॥

ભુક્ત્વા જ્ઞાનાન્નમાદૌ વિમલનરવરૈર્બ્રહ્મચર્ચા સુકાર્યા
હ્યન્યોન્યં સ્વાનુભૂતં નિરતિશયસુખં બોધયદ્ભિર્વિશુદ્ધમ્ ।
કર્તવ્યં સ્વેન નિત્યં વિગલિતવિષમં સ્વાત્મનો ધ્યાનમુચ્ચૈ-
"ર્ધ્યાતા ધ્યેયં ન કિઞ્ચિત્સકલવિરહિતં બ્રહ્મ પૂર્ણં સ્વમાત્રમ્" ॥ ૭॥

શય્યા બ્રહ્મૈવ સાક્ષાન્મૃદુતમવિમલા પૂર્ણસૌખ્યૈકદાત્રી
કાન્તા મુક્તિર્યયા વા અવિરતરમણાત્કામ એવાતિશાન્તઃ ।
નિદ્રા બ્રહ્મૈક્યરૂપા હ્યવિચલપરમાऽऽનન્દપૂર્ણા સમાધિઃ
કલ્યાણં સેવકસ્યોરુતરભયહરં સ્વાત્મસામ્રાજ્યપૂર્ણમ્ ॥ ૮॥

વાચા ચિત્તેન કેનાપ્યખિલમતિકલાશક્તિયુક્તેન નો વૈ
શક્યેત બ્રહ્મ લબ્ધું નિરતિશયસુખં વૃત્તિશૂન્યં સૂપુર્ણમ્ ।
સ્વાત્મારામં સ્વમાત્રં સતતસુવિમલં સ્વેન સૌખ્યાનુભાવ્યં
સ્વસ્મિન્સચ્ચિત્સુખાબ્ધિં વિગલિતવિષમં કેવલં વસ્તુતન્ત્રમ્ ॥ ૯॥

ઇત્થં યસ્યાસ્તિ ચર્યા પ્રતિદિવસમપિ ધ્યાનમુચ્ચૈશ્ચ કુર્વ-
ન્નાત્માનાત્માऽऽવિવેકી શમદમસુમુખૈઃ સાધનૈશ્ચાપ્યુપેતઃ ।
શુદ્ધાત્મા બ્રહ્મ સૂક્ષ્મં ભવભયરહિતં જ્ઞાનિહૃત્પદ્મસંસ્થં
જ્ઞાત્વા ત્વત્રૈવ પૂર્ણં નિરતિશયસુખી મુક્તિભાઙ્ના સ ભૂયાત્ ॥ ૧૦॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણપદાન્વિતકલ્યાણસેવકવિરચિતં
દિનચર્યાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Brahatha Mohan

*DinacharyaShTakam*

pdf was typeset on May 22, 2026

Please send corrections to *sanskrit@cheerful.com*